IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# वाक्यपदीयदिशा वैयाकरणानां प्रमाणविचारः|

Dr. Arathi K

Guest lecturer

Sree Krishna college, Guruvayur, Kerala.

**सारांशः**

व्याकरणदर्शनप्रतिपादकेषु वैयाकरणेषु प्रमुखः भवति भर्तृहरिः| सः न्यायमीमांसादिषु अनेकेषु शास्त्रेष्वपि पण्डितः आसीत्| भर्तृहरिणा अनेके ग्रन्थाः प्रणीताः| तत्र एकः ग्रन्थः भवति वाक्यपदीयं नामकः| वाक्यं च पदं च वाक्यपदे, तदधिकृत्य कृतो ग्रन्थः वक्यपदीयम्| वाक्यपदीये काण्डत्रयं वर्तते| तत्र प्रथमे ब्रह्मकाण्डे प्रत्यक्षप्रमाणम्, अनुमानप्रमाणं, शब्दप्रमाणम् इति त्रीणि प्रमाणान्यधिकृत्य प्रतिपाद्यन्ते| अत्र वाक्यपदीयकारानुसारं वैयाकरणानां प्रमाणान्यधिकृत्य प्रतिपादनम् क्रियते|

**कूटशब्दाः** - प्रमाणम्, प्रत्यक्षम्, अनुमानम्, आगमम्, अदृष्टम्, अभ्यासम्|

**वाक्यपदीयदिशा वैयाकरणानां प्रमाणविचारः**

प्रमाकरणं प्रमाणम्, अथवा प्रतीयते अनेन इति प्रमाणम्| प्रायेण प्रमाणं नवविधमस्ति| ते च प्रत्यक्षम्, अनुमानम्, उपमानं, शाब्दम्, अर्थापत्तिः, अभावः, सम्भावना, ऐतिह्यम्, चेष्टा च| तत्र पुनः वेदान्तिनः षट् प्रमाणानि, नैय्यायिकाः चत्वारि प्रमाणानि इत्येवं भिन्नशास्त्रानुसारं प्रमाणानां संख्यायामपि विकल्पाः वर्त्तन्ते| तथोच्यते दर्शनामीमांसायां-

“प्रत्यक्षमात्रं चार्वाका बोद्धा वैशेषिका द्वयम्|

सांख्ययोगास्त्रयं चैव तार्किकाश्च चतुष्टयम्||

पञ्च प्राभाकरा, भाट्टस्तथा वेदान्तिनश्च षट्|

पौराणिकस्तथा चाष्टौ प्रमाणानि ब्रुवन्ति वै”[१]||

वैयाकरणाः शब्दप्रमाणकाः भवन्ति| उक्तम् च महाभाष्ये “शब्दप्रमाणका वयं, यच्छब्द आह तदस्माकं प्रमाणं, शब्दश्च शब्दज्ञाने धर्ममाह”[२] इत्यादयः|

नव्यवैयाकरणानां मध्ये प्रमुखः भर्तृहरिः स्वस्य वाक्यपदीये प्रथमे ब्रह्मकाण्डे प्रमाणविचारः कृतः| तत्र प्रत्यक्षप्रमाणम्, अनुमानप्रमाणं, शब्दप्रमाणम् इति त्रीणि प्रमाणान्यधिकृत्य चर्चा वर्तन्ते| तान्यधिकृत्य प्रतिपाद्यन्ते प्रबन्धेऽस्मिन्|

**प्रत्यक्षप्रमाणम्**

“इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्”[३] इति प्रत्यक्षलक्षणम्| व्याकरणदर्शनमनुसृत्य प्रत्यक्षज्ञानं द्विधा वर्तते| लौकिकप्रत्यक्षम्, अलौकिकप्रत्यक्षश्चेति| अत्र लौकिकप्रत्यक्षं नाम सामान्यजनानां इन्द्रियार्थसन्निकर्षजन्यप्रत्यक्षज्ञानम्| अलौकिकप्रत्यक्षं तु ऋषीणां, योगिनां च| ऋषयः सत्यस्य दृष्टाराः भवन्ति| ते तपसा, वेदाध्ययनेन च मनसा सर्वं पश्यति| अनन्तरं जनान् प्रति वदन्ति| इदं आर्षज्ञानमिति कथ्यते| रागद्वेषादिरहितहृदयेन सह आवरणरहित, प्रकाशरूपेण प्रकटितानां ऋषीणां भूतभविष्यत्कालादि त्रिकालदार्शनिकं तत् आर्षज्ञानं प्रत्यक्षतुल्यमस्ति| अर्थात् आर्षज्ञानं प्रत्यक्षमिव वर्तते| तदुच्यते-

“आविर्भूतप्रकाशानामनुपप्लुतचेतसाम्|
अतीतानागताज्ञानं प्रत्यक्षान्न विशिष्यते”[४]||

स्वच्छे दर्पणे वयं मुखं स्पष्टं द्रष्टुं शक्नुमः| एवमेव ऋषीणां तपसा विशुद्धे अन्तकरणे अस्मदाभिः यत् अग्राह्यमपि वस्तु ते द्रष्टुं शक्नोति| तत् प्रत्यक्षमेव अस्ति|

नैयायिकानां मते इन्द्रियार्थसन्निकर्षजन्यज्ञानं प्रत्यक्षमिति पूर्वमेवोक्तम्| यत्र इन्द्रियार्थसन्निकर्षः नास्ति चेत् तत् भ्रमः, यथा रज्जुसर्पज्ञानवत्| अतः आर्षज्ञाने इन्द्रियार्थसन्निकर्षः नास्ति इत्यतः आर्षज्ञानं मिथ्या भवेत् इति संशयस्य उत्तरं प्रतिपादयति यथा-

“अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा|
ये भवान् वचनं तेषां नानुमानेन बाध्यते”[५]||

ऋषयः आर्षेणचक्षुषा पश्यन्ति| तेन चक्षुषा योगधर्मेण यत् किमपि ते पश्यन्ति तस्य वस्तुतः हेतुवादेन बाधितुं न भवति| ऋषीणां वचनप्रामाणिकतायां तत् वचनम् श्रुत्वा ये सामान्याः प्रवर्तन्ते, तेषां आर्षज्ञानं नास्ति इत्यतः तस्य गतिः का इत्युच्यते-

“यो यस्य स्वमिव ज्ञानं दर्शनं नातिशङ्कते|
स्थितं प्रत्यक्षपक्षे तु कथमन्यो निवर्तयेत्”[६]||

ऋषीणां वचनानुसारं यः कार्यं करोति तस्य ज्ञानमपि प्रत्यक्षमिव अस्ति| अतः प्रत्यक्षपक्षे स्थितं तं पुरुषम् अन्यः निवर्तयितुं न शक्नोति| ऋषिप्रोक्तकार्याणि स्वानुभवतुल्यमस्ति इति सारः| एवम् आर्षज्ञानस्य प्रत्यक्षप्रमाणत्वं स्वीक्रियते हरिणा|

**अनुमानप्रमाणम्**

"अनुमितिकरणम् अनुमानम्"७| यस्यकस्यापि वा भवतु तस्य यथार्थता वस्तुतत्वं ऊहेन वा तर्केण वा करोति चेत् अर्थात् ये अनुमानं मुख्यतया स्वीकुर्वन्ति, तेषां विनिपातः अवश्यं भविष्यति इत्युक्तं हरिणा-

"हस्तस्पर्शादिवान्धेन विषमे पथि धावता|

अनुमानप्रधानेन विनिपातो न दुर्लभः"८||

यत्र दुर्मार्गे कश्चन अन्धः गच्छति, तेन सह कोऽपि चक्षुष्मान् सहायकः नास्ति चेत् सः हस्तस्पर्शं कृत्वा दण्डस्य साहाय्येन गच्छति| किञ्चित् दूरं गतवान् सः भूमेः समतलावस्था दण्डस्पर्शनेन ज्ञात्वा इयं रीतिः अग्रेऽपि भविष्यति इत्यनुमानेन त्वरया धावति तर्हि तस्य विनिपातः निश्चयेन भविष्यति| एवं विधं हरिणा अनुमानप्रमाणस्य पूर्णतया अङ्गीकारः न दृश्यते|

वाक्यस्य श्रुतेन कदाचित् वाक्यस्य उद्दिष्टकार्यं न सम्भवति| अतः कुत्रचित् तर्कस्य आवश्यकता अस्ति इत्युक्तं यथा-

"सतोऽविवक्षा पारार्थ्यं व्यक्तिरर्थस्य लैङ्गिकी|

इति न्यायो बहुविधस्तर्केण प्रविभज्यते"९||

सतः अविवक्षा, पारार्थ्यं, लैङ्गिकी व्यक्तिः इति विषयेषु तर्कस्य आवश्यकतोच्यते| अत्र सतोऽविवक्षा नाम अर्थस्य उपेक्षा| अस्योदाहरणं यथा ग्रहं संमार्ष्टिः इति| अत्र ग्रहं नाम यज्ञे यस्य पात्रस्य उपयोगः भवति तत् पात्रम्| अत्र ग्रहं इति एकवचनस्य उपयोगः, किन्तु यज्ञे बहूनां पात्राणां आवश्यकतास्ति इत्यतः एकवचनस्य ग्रहस्य अविवक्षार्थं तर्कः आवाश्यकम्|

पारार्थ्यं इत्युक्ते उपलक्षणत्वम्| अस्योदाहरणं भवति काकेभ्यो दधि रक्ष्यताम्| अर्थात् दध्नः रक्षणं काकेभ्यः करोतु इति| अत्र काकशब्दः काकादिषु दध्युपघातकेषु उपलक्षणम्| अत्र काकः इति उपलक्षणम् इति ज्ञातव्यार्थं तर्कः आपेक्षणीयम्|

लैङ्गिकी व्यक्ति नाम लिङ्गम् अथवा सूचना| अक्ताः शर्करा उपदधाति, तेजो वै घृतम् इति उदाहरणम्| अक्ताः शर्करा उपदधाति इत्यत्र यज्ञस्य कृते यत् शिलाखण्डः भवति तत् प्रथमं लेपनं करणीयम् इत्यर्थः| किन्तु अत्र कीदृशं लेपनद्रव्यं करणीयमिति वाक्ये नास्ति| तस्य सूचना अस्ति यथा तेजो वै घृतम्| अत्र लेपनद्रव्यं घृतमेव भवति| अतः अक्ताः इत्युक्ते घृतमिति अर्थः स्वीकरणीयः| एवं बहुविधतात्पर्यनिर्णयः तर्केण क्रियते इत्यतः एतादृश विषयेषु वाक्यार्थाधिगमे तर्कमावश्यकमित्युक्तम्| अतः अनुमानस्य अथवा तर्कस्य निषेधोऽपि न दृश्यते|

**आगमप्रमाणम्**

आगमो नाम शब्दः| “आप्तवाक्यं शब्दः”[१०] इति तर्कशास्त्रेशब्दलक्षणम्| ज्योतिष्टोमेन स्वर्गकामो यजेत अर्थात् यः स्वर्गं अभिलषति तेन ज्योतिष्टोमयज्ञः कर्त्तव्यः| एतादृशं यागादिधायकानि कार्याणि आगमप्रमाणं विना न सिद्ध्यति| महर्षीणाम् अलौकिकप्रत्यक्षम् आगमप्रमाणमनुसृत्यैव भवति| “यद् शब्द आह तद् अस्माकं प्रमाणम्”[११] इत्येतत् वैयाकरणमतम्| अत्र ‘शब्द’ शब्देन वेद इत्यर्थः स्वीकर्त्तव्यः| यथा तापः अग्नेः स्वभावः भवति तथैव स्वर्गप्राप्तिः यागस्य स्वभावः| वेदस्तु वैयकरणानां परमं प्रमाणम्| तथोक्तं-

“न चागमादृते धर्मस्तर्केण व्यवतिष्ठते|

ऋषीणामपि यज्ज्ञानं तदप्यागमहेतुकम्”[१२]||

अस्मिन् जन्मनि वयं यानि कर्माणि कुर्मः तेषां सर्वेषामपि कार्याणां इष्टानिष्टफलप्राप्तिश्च भविष्यत्येव| यस्यकस्यापि पिपास अस्ति तस्य जलं देयं इत्यादयः पुण्यकर्माणि कुर्वन्ति चेत् इष्टफलं प्राप्नोति| चौर्यादि पापकर्माणि कुर्वन्ति चेत् अनिष्टफलप्राप्तिः भविष्यति| अस्मिन् प्रकारेण इदं पुण्यं, इदं पापमिति बोधप्रक्रियायां किं पुण्यं, किं पापमिति निर्णयार्थं पण्डितः आरभ्य पामरपर्यन्तं सर्वेषामपि जनेषु, ऋषीणां वचनानि परम्बरया श्रुत्वा आगमस्य किञ्चित् प्रयोजनम् अस्त्येव| एवं लोके सर्वं धर्माधर्मव्यवस्था वा पापपुण्यव्यवस्था वा तत् आगममूलकमित्युक्तं यथा-

“इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये|

आचण्डालं मनुष्याणमल्पं शास्त्रप्रयोजनम्”[१३]||

लोकप्रसिद्धाः एते प्रमाणातधिकतया अभ्यासप्रमाणम्, अदृष्टप्रमाणम् इति प्रमाणद्वयस्यापि प्रतिपादनं भर्तृहरिणा वक्यपदीये उक्तम्|

**अभ्यासप्रमाणम्**

यथा शिक्षमाणानां बालानां वर्णमालायाज्ञानं सकृत् पठनेन न भवति, किन्तु पुनः पुनः पठनाभ्यासाद् यथोत्तरं स्फुटतरं दृढं विज्ञानं जायते तथा भवति मण्यादेः ज्ञानम्| प्रथमदर्शनेन मणेः सामान्यं स्थूलं ज्ञानमेव लभ्यते, तस्य शुद्धत्वाशुद्धत्वोत्तमत्वानुत्तमत्वविशेषविषयकं सूक्ष्मविशिष्टज्ञानं न भवति| तदनन्तरं मण्यादेः पुनः पुनः दर्शनाभ्यासात् परिशीलनात् च सूक्ष्मं विशेषविषयकं ज्ञानं प्राप्नोति| तत् सूक्ष्मं विशेषविषयकं मणिज्ञानं स्वसंवेद्यं भवति, न तु परेभ्यः समाख्यातव्यम्| उपदेशनं ग्रहीतुं अशक्यं ईदृशं विज्ञानं भवति अभ्यासप्रमाणम् इति भर्तृहरिमतम्| तदुक्तं यथा-

“परेषामसमाख्येयमभ्यासादेव जायते|

मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम्”[१४]|

**अदृष्टप्रमाणम्**

केचन अप्रत्यक्षः भूत्वा अशरीरी रूपेण वार्तालाभं कर्तुं शक्यते, केचन बहिः स्थित्वा अन्तः कः इति वक्ष्यति| एतत् प्रत्यक्षेण वा अनुमानेन वा इति वक्तुं न शक्यते| एतदुच्यते यथा-

"प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः|

रक्षःपितृपिशाचानां कर्मजा एव सिद्धयः"१५||

पितृणां, राक्षसाणां, पिशाचानां च दर्शनम्, अन्तर्धानम् इत्यादयः सिद्धिः प्रत्यक्षानुमानप्रमाणेन साधयितुमशक्यते इत्यतः तत् अदृष्टशक्तिविशेषणात् अथवा अदृष्टप्रमाणात् भवति इति हरिमतम्|

**उपसंहारः**

भर्तृहरेः प्रसिद्धः ग्रन्थः भवति वक्यपदीयम्| अयं ग्रन्थः न केवलं व्याकरणशस्त्रग्रन्थात्मकम् अपि तु साहित्यात्मकश्च भवति| अत्र भर्तृहरिः प्रत्यक्षम्, अनुमानम्, आगमम्, इति प्रसिद्धप्रमाणातधिकतया अदृष्टम्, अभ्यासम् इति प्रमाणानधिकृत्यपि चर्चा क्रियते| प्रायशः इद्रियार्थसन्निकर्षजन्यज्ञानं प्रत्यक्षमिति तर्के प्रत्यक्षप्रामाणलक्षणम्| किन्तु हरिणा ऋषीणां आर्षज्ञानस्यापि प्रत्यक्षप्रमाणत्वमङ्गीक्रियते| अनुमानप्रमाणस्य अङ्गीकारो वा निषेधो वा न दर्शितम्| पितृराक्षसाणां दर्शनान्तर्धानादि सिद्धेः अदृष्टप्रमाणत्वं, मण्यादेः मूल्यनिर्णयविज्ञानस्य अभ्यासप्रमाणत्वं च उच्यते| एते पञ्चप्रमाणेषु आगमप्रमाणं मुख्यत्वेन अङ्गीक्रियते|

**उल्लेखाः**


१.बुद्धदर्शनमीमांसा, पृ. ३५६

२.व्याकरणमहाभाष्यम्, पृ.५८

३.तर्कसंग्रहः, पृ.१३६

४.वाक्यपदीयम्, पृ.५८

५.वाक्यपदीयम्, पृ. ५९

६.वाक्यपदीयम्, पृ. .६०

७.तर्कसंग्रहः, पृ.१४७

८.वाक्यपदीयम्, पृ.६२

९.वाक्यपदीयम्, पृ.२५८

१०. तर्कसंग्रहः, पृ.२२२

११.व्याकरणमहाभाष्यम्, पृ.५८

१२.वाक्यपदीयम्, पृ.४९

१३.वाक्यपदीयम्, पृ. ६०

१४.वाक्यपदीयम्, पृ.५६

१५.वाक्यपदीयम्, पृ.५७

**परामृष्टग्रन्थसूची**


१.भर्तृहरिः, वाक्यपदीयम्, सम्पा. आचार्य पं. सत्यनारायण खण्डूडी, चौखम्बा कृष्णदास अकादमी, वाराणसी, २००७.

२.पतञ्जलि, व्याकरणमहाभाष्यम्, प्रकाश-हिन्दीव्याख्या, चौखम्बा विद्या भवन, वाराणसी, २०१६

३.अन्नंभट्टः, तर्कसंग्रहः, सम्पा. डाक्टर् एन्. वीलिनाथः, मन्द्रपुरीविश्वविद्यालयः, मन्द्रपुरी, १९८०

४.केशवमिश्रः, तर्कभाषा, माधुरी व्याख्या, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९५

५.बलदेव उपाध्याय, बुद्धदर्शनमीमांसा,चौखम्बा विद्या भवन, वाराणसी, १९५४